# .. shaastRRi pa ncakaM ..

## ॥ शास्तृ पञ्चकं ॥

पादारविन्द भक्तलोकपालनैकलोलुपं
सदारपार्श्वमात्मजाति मोदकं सुराधिपम् ।
उदारमादि भूतनाथमद्भुतात्मवैभवं
सदा रवीन्दुकुण्डलं नमामि भाग्यसंभवम् ॥ १
कृपाकटाक्षवीक्षणं विभूति वेत्रभूषणं
सपावनं सनातनादि सत्यधर्म पोषणं
अपारशक्तियुक्तमात्मलक्षणं सुलक्षणं
प्रभामनोहरं हरीशभाग्यसंभवं भजे ॥ २
मृगासनं वरासनं शरासनं महैजसं
जगधितं समस्तभक्त चित्तरंगसम्स्थितम् ।
नगाधिराजराजयोगपीठमध्यवर्तिनं
मृगाङ्कशेखरं हरीशभाग्यसंभवं भजे ॥
समस्तलोक चिन्तितप्रदं सदा सुखप्रदं
समुथितापदन्धकारकृन्तनं प्रभाकरम् ।
अमर्त्य नृत्तगीतवाद्यलालसं मदालसं
नमस्करोमि भूतनाथमादिधर्मपादुकम् ॥ ४
चराचरान्तर स्थित प्रभामनोहर प्रभो
सुरासुरार्चितांघ्रि पद्मयुग्म भूतनायक ।
विराजमानवक्त्र भक्तमित्र वेत्रशोभित
हरीशभाग्यजात साधुपारिजात पाहि माम् ॥
इति श्री शास्तृ पञ्चकं संपूर्णम् ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

Please send corrections to sanskrit@cheerful.com
Last updated April 22, 2008